# वसन्तवर्णनम्

**डॉ0 सूर्यकान्त त्रिपाठी** (सहायक आचार्य)
संस्कृत विभाग, दी0द0उ0गो0वि0वि0, गोरखपुर।

भारतं प्राकृतिकसुषमासंयुतं वर्तते। वसन्त अतिकमनीय वंर्तते। वसन्तः कुसुमाकरोऽपि कथ्यते। वसन्तागमने पवनः मन्दं मन्दं नुदति। प्रकृतिवधूः सर्वेषां मनो हरति। अस्मात् कारणात् ऋतुराज इति नाम सार्थकमस्ति। सर्वत्र पिककुलानां निनादः श्रूयते। कुसुमपरागस्य सुगन्धिः सर्वत्र प्रसरति। वृक्षस्योपरि नवविकसितानां कुसुमानां सुषमा मनोहारिणी भवति। पादपाः ताम्रहरितकपिशैः पल्लवजालैः युक्ताः सन्ति। वसन्तकाले ग्रामस्य शोभा तु नितरां मनोहारिणी भवति। सायंसंध्यासु ग्रामवृद्धानां गोष्ठीबन्धस्तु विशिष्टः भवति। बालानां क्रीडनंच मनो हरति। मधुमासो मदिरेव मादयति। वसन्तकाले चैतन्यस्य परमा स्थितिः दृथ्यते। समुद्यत्पल्लवांकुरा प्रकृतिसुन्दरी दरीदृश्यते। किसलयेषु रागत्वं समुपलक्ष्यते। वसन्तस्तु प्रकृतेः शोभाविशेषः वर्तते। वसन्तकाले कुन्दकालिका प्रकम्पते। वसन्तकाले प्रकृतेः अप्रतिमं सौन्दर्यं दृश्यते।

उक्तंच–द्रुमाः सपुष्पाः सलिलं समद्यं स्त्रियः सकामाः पवनः सुगन्धिः।
सुखाः प्रदोषाः दिवसाश्चरम्याः सर्वंप्रिये चारुतरं वसन्ते।।

# विद्याधनं सर्वधनं प्रधानम्

**डॉ0 सूर्यकान्त त्रिपाठी** (सहायक आचार्य)
संस्कृत विभाग, दी0द0उ0गो0वि0वि0, गोरखपुर।

निखिले संसारे सर्वद्रव्येषु विद्याधनं सर्वश्रेष्ठं वर्तते। विद्याविहीनः पशुसमानो वर्तते। विद्याविहीनः मनुष्य पापपुण्ययो विचारं कर्तु न शक्नोति। विद्यया बिना संसारे अन्धकारस्य स्थितिः भवति। दण्डी कथयति–

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।

शब्दात्मिका ज्योतिस्तु विद्या एव। विद्यया जीवने सर्वं साध्यते। अस्मात् कारणात् उक्तम्– विद्याधनं सर्व धनप्रधानम्। विद्याधनस्य प्रधानता वर्तते यत् अन्यं धनं क्षयं याति विद्याधनमक्षयं वर्तते। विद्या धनस्य वैशिष्ट्यं वर्तते यत् केनापि चोरयितुं न शक्यते। कोऽपि नृपोऽपि विद्याधनं हर्त्तुं अक्षमः। विद्याधनं भ्रात्रा न भाज्यं भवति। धनंतु भारयुक्तं भवति, विद्याधनं कथमपि न भारकारि भवति। केन उक्तम्–

न चौरहार्यं न राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्।।

विद्यया एवं कवयः यशःशरीराः भवन्ति। विद्ययैव कालिदास– भवभूति–बाण प्रमृतयः महाकवयः स्वकाव्यत्वेन अमराः सन्ति। विद्यासम्पन्ना सर्वत्र पूज्याः वरेण्याश्च सन्ति। विद्या विनयं प्रददाति। विनयेन जीवने सर्वं सम्भवति। उक्तम्

विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद् धनमात्नोति धनाद् धर्मः ततः सुखम्।।

# निबन्धः

**डॉ0 सूर्यकान्त त्रिपाठी** (सहायक आचार्य)
संस्कृत विभाग, दी0द0उ0गो0वि0वि0, गोरखपुर।

निबन्धस्य तात्पर्यं किम्? निबन्धस्य अनेके पर्याया सन्ति। यथा–प्रस्तावः, प्रबन्धः सन्दर्भः इत्यादयः। निबन्धो तु

नामोपपत्युपसंहारानुवन्धिसरलसुगमकान्तपदविन्यास। कति प्रकारकाः निबन्धाः

भवन्ति? मुख्यत्वेन प्रकारत्रयं वर्तते–

1. आख्यानात्मकाः ।
2. वर्णनात्मकाः ।
3. विवेचनात्काः ।

निबन्धानां भाषा सर्वथा सरला भवेत्। निबन्धेषु महाकविकालिदासस्य शैली अनुकरणीया वर्तते।

निबन्ध लेखने मुख्यावयवाः सन्ति–

1. प्रतिज्ञा।
2. हेतुः।
3. निदर्शनम्
4. उपसंहारः।